**C/19/BA/Part 3/SANH/7**

# 2019

## Part–III

## SANSKRIT

## (Honours)

### PAPER—VII

*Full Marks* : 90

*Time* : 4 Hours

*The figures in the right-hand margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

*Illustrate the answers wherever necessary.*

*सर्वे प्रश्नाः समाधेयाः*

**1.** अधोलिखितयोः प्रश्नयोः *एकतरस्योत्तरं* देयम्। 1×10

(क) सचिवानां संख्याविषये योग्यताविषये च मनोर्मतं किम् ? राष्ट्रपरिचालने तेषां किमस्ति प्रयोजनम् ? कानि वा तेषां कर्तव्यानि पाठांशमवलम्ब्य आलोच्यताम्। 3+3+4

(ख) 'दूतं चैव प्रकुर्वीत'— कस्मिन् प्रसङ्गे इयमुक्तिः प्राप्यते ? के दूतरूपेण नियुज्यन्ते ? कीदृग्भूताः दूताः प्रशस्यन्ते ? दूतानां कर्तव्यविषये आलोचना विधेया। 1+2+2+5

**2.** संस्कृतमाश्रित्य निम्नलिखितयोः श्लोकयोः

*एकतरस्य* सप्रसङ्गं व्याख्या विधेया— 1×6

(क) यदि न प्रणयेद्राजा दण्डं दण्डयेष्वतन्द्रितः।

शूले मत्स्यानिवापक्ष्यन् दुर्बलान् बलवत्तराः॥

(ख) व्यसनस्य च मृत्योश्च व्यसनं कष्टमुच्यते।

व्यसन्यधधोऽधो व्रजति स्वर्यात्यव्यसनी मृतः॥

**3.** निम्नलिखितेषु शब्देषु *कयोश्चिद्द्वयोष्टीका* लेख्या— 2×2½

(क) मेधातिथिः,

(ख) राजाग्निः,

(ग) ब्राह्मणब्रुवः,

(घ) त्रैविद्यः।

**4.** अधस्तनेषु प्रश्नेषु *चतुर्णामुत्तर* संस्कृतमाश्रित्य देवनागर्य्या च विधेयम्—1×4

(क) मनुसंहितायाः अपराणि नामानि कानि ?

(ख) प्रभुः केभ्योऽशेभ्यः राजानमसृजत् ?

(ग) 'वार्तारम्भांश्च लोकतः' — अत्र 'वार्तारम्भान्' इत्यनेन किं ज्ञायते ?

(घ) रणाङ्गने राजा वा योद्धा वा कान् न हन्यात् ?

(ङ) 'सर्वतेजोमयो हि सः'— अत्र कोऽस्ति 'सर्वतेजोमयः' ?

(च) मनुसंहिता कीदृग्विधः ग्रन्थः? ग्रन्थेऽस्मिन् कति अध्यायाः सन्ति ?

**5.** अधोलिखितयोः प्रश्नयोः *एकतरस्योत्तरं* देयम् : 1×10

(क) ऋणादाने वृद्धिनियमः कः ? ऋणग्रहीतुः निधनेन के ऋणान् द्युः के वा न—इत्यस्मिन् विषये याज्ञवल्क्यस्य मतं स्पष्टीक्रियताम्। 5+5

(ख) कीदृशाः कियन्तश्च भवन्ति साक्षिणः ? के के साक्षिणो भवितुं नार्हन्ति ? याज्ञवल्क्यमतमनुसृत्य साक्षिणां वैशिष्ट्यमालोच्यताम्। 2+2+6

**6.** निम्नलिखितयोः श्लोकयोः *कस्यचिदेकस्य* संस्कृतेन देवनागरीमाश्रित्य सप्रसङ्ग व्याख्या विधेया— 1×6

(क) श्रुताध्ययनसम्पन्ना धर्मज्ञाः सत्यवादिनः।

राज्ञा सभासदः कार्या रिपौ मित्रे च ये समाः॥

(ख) न योषित्पतिपुत्राभ्यां न पुत्रेण कृतं पिता।

दद्यादृते कुटुम्बार्थान्न पतिः स्त्रीकृतं तथा॥

**7.** निम्नलिखितेषु *कयोश्चिद्द्वयोष्टीका* लेख्या — 2×2½

(क) प्रमाणम्,

(ख) स्त्रीधनम्,

(ग) प्रतिभूः,

(घ) मिताक्षरा।

**8.** अधोनिर्दिष्टेषु प्रश्नेषु *चतुर्णामुत्तर* संस्कृतमाश्रित्य देवनागरीलिप्या च विधेयम् — 1×4

(क) याज्ञवल्क्यसंहितायाः पाठांशः कस्मिनध्यायेऽन्तर्भूक्तः ? अध्यायस्य नाम किम् ?

(ख) व्यवहारस्य के के चत्वारः पादाः याज्ञवल्क्येन निर्दिष्टाः ?

(ग) राज्ञे प्रजानामावेदनं कदा विचारयोग्यं स्यात् ?

(घ) कः उत्तमर्णिकः, कश्चाधमर्णिकः ?

(ङ) पुत्रेण कृतं किमात्मकमृणं पित्रा नैव देयम् ?

(च) याज्ञवल्क्यमते प्रमाणानि कानि ?

**9.** अधस्तनयोः प्रश्नयोः *एकतरस्योत्तर* प्रदेयम्— 1×10

(क) अमात्योत्पत्तिप्रकरणे कौटिल्योल्लिखितानि पक्ष-विपक्ष-स्वपक्षमतानि संस्कृतेनोद्धृतिपुरस्सरं वर्णनीयानि। 4+4+2

(ख) 'त्रयी' इत्यनेन किं बोध्यते ? कौटिलीयार्थशास्त्रे उल्लिखितानां चतुर्वर्णानां चतुराश्रमाणां च कर्तव्यानि निर्दिश्य त्रयीविद्यासमुद्देशस्य प्राधान्यं प्रमाणीक्रियताम्।

**10.** अधस्तनयोः श्लोकयोः *एकतरस्य* व्याख्या देवनागर्य्या संस्कृतमाश्रित्य विधेया— 1×6

(क) न किञ्चिदवमन्येत सर्वस्य शृणुयान्मतम्।

बालस्याप्यर्थवद्वाक्यमुपयुञ्जीत पण्डितः।।

(ख) व्यवस्थितार्यमर्यादः कृतवर्णाश्रमस्थितिः।

त्रय्या हि रक्षितो लोकः प्रसीदति न सीदति।।

**11.** निम्नलिखितेषु *कयोश्चिद्द्वयोष्टीका* लेख्या— 2×2½

(क) मात्स्यन्यायः,

(ख) पिशुनः,

(ग) स्वधर्मः,

(घ) आन्वीक्षिकी।

**12.** अधस्तनेषु प्रश्नेषु *चतुर्णामुत्तर* संस्कृतमाश्रित्य देवनागरीलिप्या विधेयम्— 4×1

(क) कौटिलीयार्थशास्त्रे कति अधिकरणानि कियन्तश्च अध्यायाः सन्ति ?

(ख) राजा केनोपायेन लोकप्रियत्वमर्जयेत् ?

(ग) कौटिल्यमते वेदानां संख्या कति ? के च ते वेदाः ?

(घ) "सहायसाध्यं राजत्वं चक्रमेकं न वर्तते"—इत्युक्त्या कौटिल्येन राजत्वे केषां सहायता कथिता ?

(ङ) विद्याविनयानां हेतुः कः ?

(च) मन्त्रिनियोगे कौणपदन्तस्य मतं किम् ?

**13.** निम्नलिखितयोः प्रश्नयोः *एकतरस्योत्तरं* देयम्— 1×10

(क) कः भवति कौटिल्यः ? कश्चासीत् तस्याविर्भावकालः ?

तद्विरचितमर्थशास्त्रं कीदृग्भूतो ग्रन्थोऽस्ति ? किं वा

अस्ति अस्य शास्त्रस्य वैशिष्ट्यम् ? 2+1+2+5

(ख) धर्मसूत्र-धर्मशास्त्रयोर्मध्ये सादृश्यं वैसादृश्यं च निरूप्य बङ्गदेशीयपण्डितानां धर्मशास्त्रं प्रत्यवदानं लिख्यताम्।

**14.** अधस्तनेषु प्रश्नेषु *पञ्चानामुत्तरं* संस्कृतमाश्रित्य देवनागरीलिप्या विधेयम्— 5×1

(क) धर्मशास्त्रस्योपरि पि. भि. काणे-विरचितस्य प्रसिद्धग्रन्थस्य नाम किम् ?

(ख) 'स्मृतिचन्द्रिका' केन विरचिता ?

(ग) बङ्गीयस्मार्तपण्डित-रघुनन्दनस्य कृतिः का ?

(घ) विज्ञानेश्वररचितां मिताक्षराटीकामाश्रित्य केन बङ्गीयटीकाकारेण दीपकलिकाभिधा टीका विलिखिता ?

(ङ) 'योगयाज्ञवल्क्यस्मृतिशास्त्रं' केन अर्वाचीनसंस्कृत—विदुषा आविष्कृतम् ?

(च) ईश्वरचन्द्रविद्यासागरेण विधवाविवाहस्य प्रमाणं कस्मात् ग्रन्थात् प्राप्तम् ?

(छ) "याज्ञकल्क्यत्रयी"—इत्यनेन केषां रचयितॄणां नामानि आयान्ति ?

———